Shri Raghunath Temple MSS. Library,
JAMMU

No. ५५१-घ

Title चौरपञ्चाशिका

Author बिल्हणः

Extent ५ Age शके १८३४

Subject काव्यम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चौरपञ्चाशिका

५५१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सं० ५५८१५
चौरपंचाशिका
कर्ता- बिल्हण
लि. शके १८३९ वि

चौरपंचाशिका

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीमहामकुलस्मूर्तयेनमः अद्यापितांकनकचंपकदामगौरींफुल्लारविंदवदनांतनुरोमराजिं सु
प्तोत्थितांमदनविह्वललालसांगींविद्यांप्रमादगलितामिवचिंतयामि १ अद्यापिदृग्विकसितांबुज २
मध्यगौरंगोरोचनातिलकपांडुरितैकदेशं घूर्णन्मदालसविघूर्णितदृष्टिपातंकांतामुखंहृदिकदा
पिनविस्मरामि २ अद्यापितत्कनककुंडलघृष्टगंडमास्यंस्मरामिविपरीतरताभियोगे आंदो
लनश्रमजलस्फुटबिंदुकेनमुक्ताफलप्रकरविच्छुरितंप्रियायाः ३ अद्यापितांशशिमुखींनवयौ
वनाढ्यांपीनस्तनींपुनरहंयदिगौरकांतिं पश्यामिमन्मथशराहतपीडितांगींगात्राणिसंप्रतिक राम
रोमिसुशीतलानि ४ अद्यापितन्मनसिसंप्रतिवर्ततेमेरात्रावपिक्षुतवतिक्षितिपालपुत्र्या १
जीवेतिमंगलवचःपरिहृत्यकोपात्कर्णेकृतंकनकपत्रमनालपंत्या ५ अद्यापितांशशिमु
खींनवयौवनाढ्यांमुग्धमुक्तपीवरपयोधरभारखिन्नां संपीड्यबाहुयुगलेनपिबामिवामिवक्त्रं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घोन्मत्तबन्धमधुकरः कमलेयथेष्टम् ६ अद्यापितांविगलितकज्जललोलनेत्रांपृथ्वीप्रसूनकुसुमाकुल
केशपाशां सिंदूरसंललितमौक्तिकदन्तकांतिमाबद्धहेमकटकांरहसिस्मरामि ७ अद्यापितांकुटिल
कोमलवालकेशीमुन्निद्रतामरसपत्रविशालनेत्रां प्रोत्तुंगपीवरकठोरपयोधराभ्यांध्यायामिचेतसि
तथैवगुरूपदेशं ८ अद्यापितत्करजकुंकुमसमानदंततिर्य्यग्विवर्तितविलोलविलोचनाभ्यां तस्या
मुखंनागपिविस्मरामिचित्तेहृतत्तमिवहंतपरोपकारं ९ अद्यापिस्फुरन्मंजुलतांगनासंकितस्मितो ल
च्छुसितमांसलपांडुगंडं पश्यामिपूर्णशशदिंदुसमानकांतिकांतामुखंविकचपंकजपत्रनेत्रं १० अ
द्यापितन्मदनकार्मुकभंगवक्रदंतद्युतिप्रकरकर्बुरिताधरोष्ठं कर्णावशान्तविपुलोज्वलदन्तपत्रंतस्या
पुनःपुनरपीहमुखंस्मरामि ११ अद्यापितांझटितिवक्रतकेशराग्रन्यस्तैकपाणिकमलांस्वनितंब
विंबे वामांगपार्श्वलुलितदुज्वलकेशपाशांपश्यामिमांप्रतिदिशंबहुशःक्षिपंतीं १२ अद्यापिमामवि
गणय्यकृतापराधमापादमूलपतितंसहसाचलेति वस्त्रांचलंममकरान्निजमाक्षिपंतीमामेतिरो

CC-0 Dharmartha Trust J&K: An eGangotri-Vaidika Bharata Initiative

चौ॰ का॰
२

यपरुषांषुवतींस्मरामि १३ अद्यापितामतिविशालनितंबविंबांगंभीरनाभिकुहरांतनुमध्यभागां अम्ला
नकोमलम्मृणालसमानबाहुंलीलासमन्वितगतांमनसास्मरामि १४ अद्यापितत्क्षुभिततारनिमीलिता
क्षमास्मरामिसुतरांसुरतावसाने तत्कालनिःश्वसितनिकुतिकांतिकांतंस्वेदोदविंदुपरिविधुरितंप्रियायाः
१५ अद्यापितांमयिनिरागसिदृष्टिभावांसंभावयत्यपिसुकुर्निग्रहितवाचं अंतर्निरुद्धगुरुमन्युसवाष्प
कंठांनिःश्वसस्फुरदधरांरुदतींस्मरामि १६ अद्यापितांसमुपनीतनितंबवस्त्रांपश्यामिसाधुसरसाकुल
विहूलांगीं एकेनगुह्यनिहितेनकरेणपाणिमन्येननाभिकुहरात्क्षिपतींस्मरामि १७ अद्यापितांरहसिद
र्पणमीक्षमाणांवक्त्रांतिमप्रतिनिधिंमयिपृष्ठलीने पश्यामिवेपथुमतींवससंभ्रमांचलज्जाकुलांचस
मदांचसविभ्रमांच १८ अद्यापितांरतिभिउद्धतगंधलोभाद्भ्रांतमास्यमलंप्रतिचंचरीकं किंचिच्च
लच्चकितकुंचितचारुनेत्रांपश्यामिकेलिकमलेसुविवारयंतीं १९ अद्यापितामितइतस्ववपुस्वप
श्वादंतर्वहिःपरितस्ववपरिश्रमंतीं पश्यामिकुद्धकनकांवुजसंन्निभेनवक्त्रेणतीर्थ्यगुपवर्तितलोच

राम
२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नेन २० अद्यापितानिममचेतसिसंस्फुरंतीकर्णांतसंगतकटाक्षनिरीक्षणानि तस्याःस्मरोज्वलकराणि
मदालसानिलीलाविलासचटुलानिविलोचनानि २१ अद्यापितांमयिकपाटसमीपलीनेमन्मार्गमुक्तदृश
माननदत्तहस्तां मत्पादचिह्नितपदंमृदुकाकलीभिः किंचिच्चगानमनसांमनसिस्मरामि २२ अद्यापितांसु
रतरागतदत्तमास्यमालिप्तचंदनरसापांडुकांतं कस्तूरिकाकुटिलपत्रलताभिरामंगंडस्थलंहृदिमुहुःस्मरया
मितस्याः २३ अद्यापितत्कचचयग्रहणाग्रहेणदंतैर्मयात्वधरवाससिखंडमाने तस्याम्मनाग्मुकुलिताक्ष
मलक्ष्यमाणसीत्कारगर्भमसकृद्वदनंस्मरामि २४ अद्यापितानिहृदयेममसंस्फुरंतिबिंबोष्ठपृष्ठपरिकीर्ण
शुचिस्मितानि पीयूषपूरमधुराणिचहृन्नराणिवाक्यानिगद्गदतमानिमृदूनितस्याः २५ अद्यापितांकनक
पत्रसनाथकर्णांमुग्धतुंगपीवरकुचार्पितचारुहारां कांचीनिपातितविशालनितंबबिंबामुद्दामनूपुरर
णाच्चरणांस्मरामि २६ अद्यापितांभुजलतार्पितबाहुपाशांवक्षस्थलेसमसिधायपयोधराभ्यां ईषन्नि
मीलितसशीलविलोचनाभ्यांतंपश्यामिमद्वदनमुन्मदनंपिबंतीं २७ अद्यापितानिपरिवर्तितकंधराणि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चौ का
३
3

चंचत्कुचत्रुटितकंचुकजालकानि तस्मात्सुजाकुदुज्वलकुंडलानिचितेस्मरंतिममवक्रविलोकनानि २८ अ
द्यापितामनुनयत्सपिमधकांआमाहृत्यकेलिशयनेशयितांपरात्रिं निद्राकुलाभिचकिताभिमुखीभवंतीं
शनमिदंगानिहृतेकमुजेस्मरामि २९ अद्यापितांस्मितमुखींपरुषोचितेस्थुलवालकाकुलकपोलतांस्मरा
म्मि ३० अद्यापितांविरपतेपथिवाल्पंतियांतीसमागतवतींपरिवर्तमाना उद्भ्रांधितांकिमपिसंचलितांनि
द्वेलांमेयासमाश्रितवतीमधिकांस्मरामि ३१ अद्यापितांसुनिभृतेक्रममापतंतंमोहारिवीक्ष्यसहसेवनि·
घसंसुप्तां मंदंमयिस्पृशतिकंटकितांगयष्टिमुत्फुल्लगंडफलिकांवहुशःस्मरामि ३२ अद्यापितामस्तराय
त्यरुरोत्तराक्षैर्मोपृच्छमानमपिमामविभावयंतीं उद्बोक्ष्यनिश्चलदृशंवहुनिःश्वसंतींचिंताकुलांकिमपि राम
नम्रमुखींस्मरामि ३३ अद्यापितांजघनदर्शनलालसेनकांतांमयातिवसनावलमेकपार्श्वम् सुप्तोत्थि
तामपरतोमुकुराप्लवंतीमहृष्टसंकुलितसर्वतनुंस्मरामि ३४ अद्यापितांप्रथममेवगतेविरामेतीर्ष्यकु
सरोषपरुषैर्वचनैर्मुहुर्माम् आंदोलयनिहततनितंवसहायहत्यासंचिंतयाभिरतयेवदतीमभीक्ष्णं ३५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अद्यापितांविलुलितश्लथकेशपाशांकिंचि[illegible]समुन्मिषितघूर्णितदीर्घनेत्रां सुप्तोत्थितांविदधतीं
सुकुरंगभंगांपश्यामिदष्टमधरंवकुशाःस्पृशंतीं ३६ अद्यापितांसुवनोवदतींवियत्कांमध्येवसन्निधिपदंअपि
क्षमात्रे नामोत्तरंप्रियसखीषुहृतस्मितासुलज्जाविलाससहितांहृदिचिंतयामि ३७ अद्यापितामनुनयत्य
पिचाटुपूर्वंकोपात्पराहृतमुखींपपयिसापराधे आलिंगतिप्रसभमुत्पुलकांगयष्टिमामेतिनिःस्पृहमिहोक्ति
वतींस्मरामि ३८ अद्यापितामुषसितत्क्षणविप्रबुद्धांनिद्रालसांहृदिधरामिहृतांगभंगां जृंभाविदीर्णमु
खमाहृतगंधलुब्धमुग्धभ्रमद्भ्रमरविभ्रमलोलनेत्रां ३९ अद्यापितांसमधिगम्यभयाद्व्रताक्षीकोपंवदत्स
पिहितेवकुशाःसखीभिः मातर्नविघ्नइतिसस्मितमुच्छ्वसंतीमुत्पन्नकंपपुलकाकुलितांस्मरामि ४० अद्या
पितांप्रथमसंगमजातलज्जांनित्यप्रसादितकरेमयिमंदमंदं फूत्कारकंपितशिखातरलप्रदीपंकर्णोत्प
लेनचजिघांसुमिमांस्मरामि ४१ अद्यापितांहृतवकुस्मितकंपितोष्ठींलीलानिपीडितमिलज्ज्वलदीर्घ
नेत्रां पश्यामिपार्वणनिशाकरकांतिकांतिसाम्यमुरःस्थितमियावमनघमार्गं ४२ अद्यापितांजय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चौ॰ पा॰ ४

तिसुंदरलब्धपूर्णोचान्योन्यमुन्नमधुराणाविकसंतिचित्ते अस्माभिरस्तुपरिमितंतुतथापिसर्वंसामांगमेतिवनि
तापिचदक्षिणांगं ४३ अद्यापितांममपुनस्त्वरितंमदांधंरोमांचतादृशलसज्वपलस्वभावां मुकुलत्पकेशर
रजःकरपत्रयोगां किंचित्क्षमंकथयमानसराजहंसीं ४४ अद्यापितांनृपतिकेशरराजपुत्रींसंपूर्णयोव
नमदालसघूर्णनेत्रां गंधर्वयक्षसुरकिन्नरराजकन्यांसद्देवयोनिपतितामिवचिंतयामि ४५ अद्यापि
तांनिजवपुःक्रमवेदिमध्यांमत्तेभकुंभशहृशस्तनशुभ्रशोभां नानाविचित्रकृतमज्जनमंडितांगींक्रीडो
त्सुकास्मिजननीतिसवेपमानांअंगांगसंगपरिचुंबनलग्नशोभं ४६ मज्जाविशेषधिसुधांप्रमदां
स्मरामि क्रीडोत्सुकास्मिजननीतिचवेपमानांअंगांगसंगपरिचुंबनलग्नशोभंमज्जांविशेषधिसु
धांप्रमदांस्मरामि ४७ अद्यापितांसुरतकेलिषुशास्त्रयुक्तांवेधोपवंधपवनोज्झितशून्यभावां
दंतोष्ठघातननखक्षतरक्तजिह्वांकांतांस्मरामिरतिवंधनवीरचिंतां ४८ अद्यापितांसुरवधूसु
भगप्रयोगांशक्रोपिनान्यविधिनात्वरितंकदाचित् तद्वारणोमरणामेवहिदुःखशांत्यैविज्ञाप्य

राम
४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative


चिंतितमितिश्वसितंन्नुनीतं ४९ अद्यापिनोज्झतिहरः किलकालकूटंकूर्मोविभर्तिधरणीं
खलुपृष्ठभागे अंभोनिधिर्वहतिदुःसहवाडवाग्निमंगीकृतंसुकृतिनः परिपालयंती ५०
इतिश्रीचौरपंचाशिकासंपूर्णा ❀ ❀ ❀ शाके वेदअद्रिचंद्रेमितेचमाघेमासेपूर्णिमायां
तिथौच भानोर्वारेतस्मिन्नक्षेतथैवशायंकालेपूर्णतामागतोयं १ यथाकविर्ध्यायतिस्वांतम
ध्येवियोगिनींतांचतयाविहीनः तथाप्यहंरामपदारविंदंध्यायामिनित्यंचसुखमुक्तिहेतोः २
अद्यापिरामंचपुरात्प्रयातंसभ्रातरंचप्रियया चयुक्तं पश्चात्प्रयांतीवप्रजारुदंतीदृष्टेवदुःखे
नचदुःखितोहं ३ अद्यापिरामेगहनेप्रयातेतदुःखदुःखेनमृतेचराज्ञि वशिष्ठवाक्यात्प्र
णिधिर्गतोयद्विज्ञापयामासचतत्स्मरामि ४ अद्यापिदूतस्यसुखानुकूलावाक्येनुरामा
नुजआजगाम आगत्यचौतःपुरराममातुस्तस्यापिसंवादमहंस्मरामि ५ प्रेमवद्धभस्मलिपिः

राम
५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative


५

श्री शाके १७४८ सौरेशपौषदिन १८ गते सोम
पौषशुक्ल ४ शतभिषान क्षत्रे इष्टं ३७ १८
चत्वारिंशो ष्टः प्रविष्टः लग्नं



सू चं मं बु र शु श रा के

संवत १८४८ सौरेशपौषदिन १८ गते सो
मे पौषशुक्ल १४ सूर्योदयादिष्टं ५३।०



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative